# Chidambara Nataraja Vichintana Dashakam with Translation

# चिदम्बरनटराजविचिन्तनदशकं सार्थम्

## Document Information

Text title : Chidambara Nataraja Vichintana Dashakam with Translation

File name : chidambaramahAnaTam.itx

Category : shiva, dashaka

Location : doc_shiva

Author : umApati shivAchArya

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Translated by : Rajani Arjun Shankar

Latest update : August 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 27, 2024

*sanskritdocuments.org*

# चिदम्बरनटराजविचिन्तनदशकं सार्थम्

दयाकर सभापते तव तु बिल्व-पत्रादिभिः
समर्च्य पद-पङ्कजं सुलभमेव कैवल्यदम् ।
कदाऽहमभवद्दयो विषय-लम्पटोऽज्ञः कथं
चिदम्बर-महानटं हृदि विचिन्तये सन्ततम् ॥ १॥

O Merciful lord of the Dancing Hall ! Having worshipped your lotus-feet that easily confer salvation, with Bilva leaves etc., when and how can I meditate upon (you,) the great dancer of Chidambaram, in my heart constantly? I am bereft of your grace, hankering after sense-objects, and ignorant. 1

न चास्मि कुशलः श्रुतौ स्मृति-पुराण-काव्येषु वा
कलासु विविधासु वा परिचितोस्म्यहं नैव भोः ।
कथन्नु मयि भूभुजां भवतु हर्षपूरः स्वतः
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ २॥

I am not well-versed in the Vedas, Smritis, Puranas and Kavyas. I am not acquainted with various arts either. How will the delight of kings be directed towards me? (Being thus unlearned and deserving your mercy,) I meditate upon you, the great dancer of Chidambaram, in my heart. 2

नटेश सुरपूजितं तव तु कुञ्चिताङ्घ्रिं जना
विचिन्त्य सकलेप्सितं समुपयान्ति भक्ता न किम् ।
कथन्नु विषयोन्मुखः शिव कपर्दिनं सन्ततं
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ३॥

O Lord of dancers! Meditating upon your bent(dancing) foot, which Devas adore, devotees attain all their desires, do they not? O Shiva! Being inclined towards sense-objects, how can I meditate upon you, the one with great matted locks, the great dancer of Chidambaram, constantly in my heart ? 3

सदाशिव भवान् स्मृतः क्षणिकतोऽपि सर्वार्तिहा
विना समय-देशकावहह भाग्य-हीनस्त्वयं
त्वदीय-परिचिन्तना-रहित-नष्ट-जन्मा सदा
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ४॥

O Sadashiva! Even if thought of for a second, you remove all sorrows. I am unfortunate, lacking the occasion (time) and the setting (place) (to think of you). My life is wasted devoid of your thoughts. (Realizing this) I meditate upon you, the great dancer of Chidambaram, constantly in my heart. 4

त्वमेव जनको मम त्वमसि मे प्रसूरुन्मनाः
त्वमेव सुहृदुत्तमः त्वमसि सूनु-दारादयः ।
भवन्तमगजाधिप त्रिदश-सार्वभौम त्वहं
चिदम्बर-महानटं हृदि विचिन्तये सन्ततम् ॥ ५॥

You are my father, you are my adoring mother. You are the best of friends, you are my children and spouse etc. O Lord of Parvati, the daughter of the mountain! O Sovereign of the gods! I meditate upon you, the great dancer of Chidambaram, constantly in my heart. 5

मृकण्डु-तनयं पुरा शमन-पाश-सम्पीडितं
यदीय-पदपङ्कजं शरणमेतमाव स्वयम् ।
निहत्य यमुनाग्रजं शिततम-त्रिशूलेन तं
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ६॥

I meditate in my heart, upon you, the great dancer of Chidambaram, who protected Markandeya, who was caught in the noose of Yama, and had sought refuge in your lotus-feet, (you who protected him by) slaying Yama, the brother of Yamuna, with the sharpest trident. 6

उमासख चिदात्मकं तव तु दिव्य-रूपं विभो
हृदन्तर-निविष्टमप्यहमपारयन् वीक्षितुम् ।
मुधैव विचरन् बहिर्व्यपनयंश्च कालं कदा
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ७॥

O Companion of Uma! I am unable to perceive your divine form that is pure consciousness, even though it is inherent inside the heart (of everyone). When will I - wandering outward, wasting my time - meditate upon you, the great dancer of Chidambaram ? 7

विमृश्य मयि किल्बिषानवगुणोऽस्त्ययं नार्हति
प्रकाममति-दुष्टधीः मम पदाब्जयोः संश्रयम् ।
इति क्षिपसि चेत् प्रभो कमुपयामि भीतस्त्वतः
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ८॥

Having considered the faults in me, if you reject me thinking “This man is deficient in virtues, very ignoble-minded, and does not deserve asylum at my lotus-feet”, then who (else) can I , filled with fear, approach? I meditate upon you, the great dancer of Chidambaram, in my heart. 8

जनाः कति कति त्रिगो सकलवेद-सारात्मकं
पुरातन जनुःकृतैः सुकृत-सञ्चयैस्त्वां किल ।
समर्च्य कृतिनो न किं दुरितकृत् कथं त्वामहं
चिदम्बर-महानटं हृदि विचिन्तये सन्ततम् ॥ ९॥

O Three-eyed one! A few people, as a result of heaps of merit earned in previous births, worship you, the essence of all the Vedas, and attain the purpose of life. Is it not so? How can I, committing sins, meditate upon you, the great dancer of Chidambaram, in my heart constantly ? 9

पतञ्जलि-तपःफलं मुनिजनौघ-जीवातुकं
प्रपन्न-जन-कल्पकं यति-हृदब्ज-संवासिनम् ।
सुपूजितमहर्निशं श्रुति-पथैक-निष्ठैर्द्विजैः
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ १०॥

I meditate, in my heart, upon you, the fruit of Patanjali's penance, the elixir of the Rishis, the wish-fulfilling tree to people who have sought refuge, the resident of the hearts of ascetics, the one worshipped day and night by the (three thousand) Dikshitas established in the path of the Vedas, the great dancer of Chidambaram. 10

इति श्री उमापतिशिवाचार्यविरचितं
चिदम्बरनटराजविचिन्तनदशकं सम्पूर्णम् ।

# चिदम्बरनटराजविचिन्तनदशकं सार्थम्

## मूलम्

दयाकर सभापते तव तु बिल्व-पत्रादिभिः
समर्च्य पद-पङ्कजं सुलभमेव कैवल्यदम् ।
कदाऽहमभवद्द्यो विषय-लम्पटोऽज्ञः कथं
चिदम्बर-महानटं हृदि विचिन्तये सन्ततम् ॥ १॥

न चास्मि कुशलः श्रुतौ स्मृति-पुराण-काव्येषु वा
कलासु विविधासु वा परिचितोस्म्यहं नैव भोः ।
कथन्नु मयि भूभुजां भवतु हर्षपूरः स्वतः
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ २॥

नटेश सुरपूजितं तव तु कुञ्चिताङ्घ्रिं जना
विचिन्त्य सकलेप्सितं समुपयान्ति भक्ता न किम् ।
कथन्नु विषयोन्मुखः शिव कपर्दिनं सन्ततं
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ३॥

सदाशिव भवान् स्मृतः क्षणिकतोऽपि सर्वार्तिहा
विना समय-देशकावहह भाग्य-हीनस्त्वयं
त्वदीय-परिचिन्तना-रहित-नष्ट-जन्मा सदा
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ४॥

त्वमेव जनको मम त्वमसि मे प्रसूरुन्मनाः
त्वमेव सुहृदुत्तमः त्वमसि सूनु-दारादयः ।
भवन्तमगजाधिप त्रिदश-सार्वभौम त्वहं
चिदम्बर-महानटं हृदि विचिन्तये सन्ततम् ॥ ५॥

मृकण्डु-तनयं पुरा शमन-पाश-सम्पीडितं
यदीय-पदपङ्कजं शरणमेतमाव स्वयम् ।

निहत्य यमुनाग्रजं शिततम-त्रिशूलेन तं
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ६॥

उमासख चिदात्मकं तव तु दिव्य-रूपं विभो
हृदन्तर-निविष्टमप्यहमपारयन् वीक्षितुम् ।
मुधैव विचरन् बहिर्व्यपनयंश्च कालं कदा
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ७॥

विमृश्य मयि किल्बिषानवगुणोऽस्त्ययं नार्हति
प्रकाममति-दुष्टधीः मम पदाब्जयोः संश्रयम् ।
इति क्षिपसि चेत् प्रभो कमुपयामि भीतस्त्वतः
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ ८॥

जनाः कति कति त्रिगो सकलवेद-सारात्मकं
पुरातन जनुःकृतैः सुकृत-सञ्चयैस्त्वां किल ।
समर्च्य कृतिनो न किं दुरितकृत् कथं त्वामहं
चिदम्बर-महानटं हृदि विचिन्तये सन्ततम् ॥ ९॥

पतञ्जलि-तपःफलं मुनिजनौघ-जीवातुकं
प्रपन्न-जन-कल्पकं यति-हृदब्ज-संवासिनम् ।
सुपूजितमहर्निशं श्रुति-पथैक-निष्ठैर्द्विजैः
चिदम्बर-महानटं हृदि विचिन्तये त्वामहम् ॥ १०॥

इति श्री उमापतिशिवाचार्यविरचितं
चिदम्बरनटराजविचिन्तनदशकं सम्पूर्णम् ।

Encoded, proofread, and translated by Rajani Arjun Shankar

*Chidambara Nataraja Vichintana Dashakam with Translation*

pdf was typeset on August 27, 2024

Please send corrections to *sanskrit@cheerful.com*